International Journal of Sanskrit Research 2021; 7(4): 33-40

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 33-40
© 2021 IJSR
www.anantaajournal.com
Received: 06-05-2021
Accepted: 17-06-2021

**डॉ. स्वपनमालः**

सहायकाध्यापकः संस्कृतविभागः,

रायगञ्जविश्वविद्यालयः

उत्तरदिनाजपुरम्, पश्चिमबङ्गः,

भारत

Corresponding Author:

**डॉ. स्वपनमालः**

सहायकाध्यापकः संस्कृतविभागः,

रायगञ्जविश्वविद्यालयः

उत्तरदिनाजपुरम्, पश्चिमबङ्गः,

भारत

# श्वेताश्वतरोपनिषदि त्रिकदर्शनप्रोक्तपाशतत्त्वविमर्शः

**डॉ. स्वपनमालः**

**DOI:** https://doi.org/10.22271/23947519.2021.v7.i4a.1417

**शोधसारः**

विश्वसाहित्ये संस्कृतसाहित्यस्य स्थानमतीव महत्वपूर्णमित्याधुनिकाः गवेषकाः प्रवदन्ति। अस्मिन् विश्वे भारतीयसाहित्यस्य तथा संस्कृतसाहित्यस्य भारतीयसंस्कृतेश्च प्रतिफलनमपि दृश्यते। भारतीयसंस्कृतेः परम्परायाश्चादिभूतसाहित्यं खलु वैदिकसाहित्यम्। वैदिकसाहित्यमिदं ऋग्वेदादिक्रमेण विभागचतुष्टयसम्पन्नम्। प्रतिवेदेषु संहिताब्राह्मणादिक्रमेण विभागचतुष्टयोऽप्यस्ति। एतेषु संहितादिविभागचतुष्टयेषु वेदान्तसाहित्यं तथोपनिषत्साहित्यमन्यतमम्। विविधासूपनिषत्सु श्वेताश्वतरोपनिषदपि प्रख्याता। अस्यां कृष्णयजुर्वेदीयश्वेताश्वतरोपनिषदि दार्शनिकवचनसमृद्धं विविधमतं प्रतिफलितम्। तेषु दार्शनिकतत्त्वेषु सांख्य-योग-वेदान्त-शैवतत्त्वादि तत्र परिलक्षितम्। शैवदर्शनस्य सम्प्रदायेषु काश्मीरीयशैवदर्शनं तथा त्रिकदर्शनमतीव प्रसिद्धम्। अस्मिन् काश्मीरीयशैवदर्शने त्रिकदर्शने वा त्रिकतत्त्वं तथा पति-पशु-पाशतत्त्वालोचितम्। पाशतत्त्वमिदं श्वेताश्वतरोपनिषदि शक्तिः प्रकृतिः मायेत्यादिना नाम्नोल्लिखितम्। तेन साकं पतितत्त्वमपि तत्र प्रतिफलितमित्येतान् विषयान्नवलम्ब्य प्रस्तुतोऽयं शोधसारः।

**मुख्यशब्दाः**– वैदिकसाहित्यम्, श्वेताश्वतरोपनिषद्, दर्शनम्, त्रिकदर्शनम्, पतिः, पशुः, पाशः, शक्तिः।

## प्रस्तावना

विश्वसभ्यताया उन्मेषपर्वणि बहुषु देशेषु भारतबर्षे च ज्ञानस्य प्रकाशोऽभवत्। ज्ञानमिदमवलम्ब्य परवर्तिनि काले तद्द्विधा जाता यथार्थायथार्थभेदेन। यथार्थज्ञानं प्रमेत्युच्यते भारतीयवाङ्मये। प्रमारूपं यथार्थज्ञानं स्वीकृत्य भारतीयसभ्यता संस्कृतिश्च प्रभाविताऽभवत्। परन्त्विदमवश्यमेवं ज्ञातव्यं यत् भारतबर्षस्य परमैतिह्यं स्वातन्त्र्यमेव संस्कृताधीनमिति। ज्ञानविज्ञानादिनां परममहदाकरः तथोत्सः ह्ययं वेदः। वेदो समग्रभारतीयानां संस्कृतिनां धर्माणां परम्पराणाञ्चोत्सो ग्रन्थः। वैदिकोत्तरसाहित्यानां परमाश्रयोऽप्ययं महान् वेदः। अस्मिन् प्रसङ्गे मतमिदमुद्धतव्यं श्रीमता भगवत्पादेन मनुनोक्तम्-

वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।
आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।(तर्करत्न)

एकोऽखण्डोऽयं महान् वेदो पूज्यपादेन व्यासेन ऋक्-साम-यजुः-अथर्वक्रमेण विभागचतुष्टयोऽभवदिति प्रसिद्धिरस्ति। पुनश्च प्रतिवेदः संहिता-ब्राह्मण-आरण्यक-उपनिषदिति भेदेन विभागचतुष्टयसम्पन्नोऽभवत्। संहिताब्राह्मणांशः कर्मकाण्डरूपेणारण्यकोपनिषदंशः ज्ञानकाण्डरूपेण प्रसिद्धोऽस्ति भारतीयसंस्कृतौ। उपनिषद्साहित्यस्य प्रभावो विश्वे विद्यमानोऽभूतपूर्वरूपेण। अस्योपनिषद्शब्दस्यार्थप्रसङ्गे भगवत्पूज्यपादेन श्रीमता शङ्कराचार्येणोक्तम्- सेयं ब्रह्मविद्योपनिषच्छब्दवाच्या तत्पराणां सहेताः संसारस्यात्यन्तावसादनात्। उप-नि-पूर्वस्य सदेस्तदर्थत्वाद् तादर्थाद् ग्रन्थोऽपि उपनिषदुच्यते। अर्थादुपनिषद्शब्दस्य मुख्यार्थो ब्रह्मतत्त्वप्रतिपादिका पराविद्या। गौणार्थस्तु ब्रह्मतत्त्वप्राप्तेर्सहायकाः ग्रन्थाः। पाश्चात्यदेशीयपण्डितप्रमुखैरप्युपनिषद्शब्दस्य व्याख्यायामुच्यते– The explanation offered by the Indians of the word Upanishad as rahasyam, 'Secret' is correct.(Deussen) अस्या उपनिषदोऽपरं नाम वेदान्त इति। शास्त्रे कथितमस्ति- वेदान्तो नामोपनिषत्प्रमाणं तदुपकारीणि शारीरकसूत्रादीनि च।(मेधाचैतन्य) उपनिषदः संख्याविषये विविधं मतं विद्यते। तद्धेतौ A. N. Bhattacharya महोदयेनोक्तम् … among the works surviving, it is difficult to ascertain the exact number that should be regarded as authentic Upanishads.(Bhattacharya) मुक्तिकोपनिषद्युद्घोषितम्-

ईश-केन-कठ-प्रश्न-मुण्ड-माण्डुक्य-तित्तिरिः।
ऐतरेयं च छान्दोग्यं बृहदारण्यकं तथा।।(क. द्विवेदी)

अत्र श्वेताश्वतरोपनिषदोऽभिधानं नास्ति। तस्मात् कारणात् केचन प्रवदन्ति अस्या उपनिषदः तत्र मुख्यदशोपनिषत्सु स्वीकरणं नास्ति। अतः इयं श्वेताश्वतरोपनिषद् न प्रधानोपनिषत्स्वन्तर्गता। परन्त्वपरजनाः स्वीकुर्वन्ति यदियन्तु प्रधानोपनिषदिति। Dr. A. N. Bhattacharya महोदयेनोक्तम्- Sankaracharya wrote his celebrated commentaries on the Isha, Kena, Katha, Prashna, Mundaka, Mandukya, Aitereya, Taittiriya, Chandogya, Brihadaranyak and possibly also the Svetasvatara Upanishad.(Bhattacharya) एतस्माद् ज्ञायते यद् श्वेताश्वतरोपनिषदो भाष्यकारः खलु शङ्कराचार्यः। तस्मादुच्यते इयमुपनिषद् प्रधानोपनिषद्रूपेण प्रसिद्धा विबुधगोष्ठ्याम्। कृष्णयजुर्वेदीयाया अस्या उपनिषदः प्रवक्ताऽस्ति ऋषिश्वेताश्वतरः। अस्यामुपनिषद्युद्घोषितम्-

तपः प्रभावाद्देवप्रसादाच्च
ब्रह्म ह श्वेताश्वतरोऽथ विद्वान्।
अत्याश्रमिभ्यः परमं पवित्रं
प्रोवाच सम्यगृषिसंघजुष्टम्।।(अनिर्वाण)

अर्थात् तपोकार्यस्य प्रभावेनेश्वरानुग्रहेण च ऋषिः श्वेताश्वतरः ब्रह्मतत्त्वं विज्ञाय ऋषिसंघेन परिसेवितमिदं पवित्रतत्त्वमन्तेवासिनां समीपे सम्यग्रूपेणोक्तवान्। अस्मात् प्रतीयते ऋषिः श्वेताश्वतरोऽस्या उपनिषदः प्रवक्ताऽस्ति। श्वेताश्वतरशब्दस्यार्थविषयेऽपि पण्डितमहले मतानैक्यमस्ति। किन्तु श्वेताश्वतरोपनिषदः प्रसिद्धटीकाकारस्याचार्यस्य शङ्करानन्दस्याभिमतमस्मिन् प्रसङ्गे स्मरणयोग्यम्। तेनोक्तम्- श्वेता अवदाताः सदाऽन्तर्मुखत्वेन विपरीतप्रवृत्तिरहिता अश्वा इन्द्रियाणि यस्य स श्वेताश्वः। अतिशयेन श्वेताश्वः श्वेताश्वतरः। अष्टाङ्गयोगनिरत इत्यर्थः।(आपटे) S. C. Chakravarti महोदयेनाप्युक्तम्- The Svetasvataropanisad belongs to the black Yajurveda and is looked upon by many as one of the most important Upanishads. It is said that Svetasvatara told it only to the most worthy among the hermits. Samkara thought fit to make it the subject of special commentary. It is said to have derived its name from its author, Svetasvatara, which literally means white mule.(Chakravarti) अस्यामुपनिषदि षडाध्याये त्रयोदशोत्तरशतसंख्यकाः श्लोकाः

समुपस्थिताः। अत्रोपनिषदि बहुविधं तत्त्वं प्रतिफलितम्। तन्मध्ये दार्शनिकतत्त्वेषु शैवदर्शनतत्त्वम्, सांख्यतत्त्वम्, योगतत्त्वम्, वेदान्ततत्त्वम्, कर्ममार्ग-ज्ञानमार्गयोर्समन्वयसाधनम्, भक्तितत्त्वमित्यादिवत् बहुविधं तत्त्वं तत्र श्वेताश्वतरोपनिषदि प्रतिफलितम्। एतेषु दार्शनिकतत्त्वेषु शैवदार्शनिकतत्त्वमतीव निगूढतयास्यामुपनिषदि निहितमस्ति। अत्र झंकृतमस्ति शिवतत्त्वं सूक्ष्मात् सूक्ष्मतरम्। प्रकृतितत्त्वतोऽपि सूक्ष्मतममिति। अत्र ऋषिश्वेताश्वतरेणामन्त्रितम्-

सूक्ष्मातिसूक्ष्मं कलिलस्य मध्ये
विश्वस्य स्रष्टारमनेकरूपम्।
विश्वस्यैकं परिवेष्टितारं
ज्ञात्वा शिवं शान्तिमत्यन्तमेति।।(गम्भीरानन्द)

अतः शिवतत्त्वमपरतत्त्वेभ्यः सूक्ष्मातिसूक्ष्मतममिति शास्त्रे कथितमस्ति। प्रख्यातभारततात्त्विकेन **R. D. Ranade** महोदयेनोद्घोषितम्- The Svetasvatara seems to have been written in the interests of Saivism.(Ranade)
वैदिकयुगे घोरस्वभावसम्प्न्नस्य प्रलयकर्तुः रुद्रदेवस्य स्तुतिर्परिलक्षिता। रूद्रदेवस्यानुध्याने शिवशब्दस्य व्यवहारो दृश्यते। अस्य शिवशब्दस्यार्थः रूद्रमहाशब्दकारी। शुक्लयजुर्वेदीये वाजसनेयिसंहितायां कथितमस्ति- उच्चैः घोषः।(जगन्नाथशास्त्री) सममतं प्रकाशयति निरुक्तकारः यास्काचार्योऽपि। तेनोक्तम्- रुद्रो रोतीति सतः।(Sarup) ऋग्वेदे आमन्त्रितम्- रोदयति सर्वमन्तकाले इति। (चौवे) अथर्ववेदे झंकृतम्- रोदयति शत्रून् इति रूद्रः।(जगन्नाथशास्त्री) वैदिकसाहित्ये अग्निदेवः मङ्गलमयशिवरूपेणापि कल्पितः- शिवो भूत्वा मह्यमग्ने अयो सीद शिवस्तं शिवः कृत्वा दिशः सर्वाः स्वं योनिमिहासदः(जगन्नाथशास्त्री) अस्यां श्वेताश्वतरोपनिषद्यामन्त्रितं यत् हे रुद्र! गिरिशन्त! तव मङ्गलमय-सौम्य-पुण्यव्यञ्जक-स्वरूपमूर्तिमयरूपेणास्मान् कल्याणमार्गे नय-

या ते रुद्र शिवा तनुरघोराऽपापकाशिनी।
तया नस्तनुवा शन्तमया गिरिशन्ताभिचाकशीहि।।
(Tyagisananda)

महाभारतेऽपि शिवस्य मङ्गलमयरूपमुक्तम्-

अग्निश्च शिव नाम शक्तिपूजापरश्च सः।
दुःखार्तानां च सर्वेषां शिवकृत् सततं शिवः।।
(हरिदाससिद्धान्तवागीश)

ऊणादिसूत्रे कथितमस्ति- शीङ् स्वप्ने- इति सूत्रेण स्वप्नार्थकं शीधातोरुत्तरं सर्व्वनिर्घृषव- रिष्वलष्वशिवपद्वप्रहेष्वतन्त्रे(Vasu) इति सूत्रेण वन्प्रत्ययेन शिवशब्दस्योत्पत्तिः। अर्थात् स्वप्नं वाति क्षिपतीति शिवः जाड्यरहितोऽविद्यानिर्मुक्त इत्यर्थः। यद्वा स्वप्नमविद्यां वाति गच्छीति शिवः।(Tapasyananda) तत्र पुनरपि कथितमस्ति-

हिसिधातोः सिंहशब्दो वश्कान्तौ शिवः स्मृतः।
वर्णव्यत्ययतः सिद्धौ पश्यकः कश्यपो यथा।।
(Tapasyananda)

अर्थात् तुदादेर्वशतेः दीप्तिरर्थः कान्तिदीप्तिः। अदादेर्वष्टिरिति कामना अर्थः। अथवा- यद्वा स्वस्मिन् प्रपञ्चं प्रकाशयतीति शिवः।(Tapasyananda) शिवशब्दस्यानेके पर्यायवाचिनः शब्दाः परिलक्ष्यन्ते अमरकोषे। तत्रोल्लिखितमस्ति-

शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः।
ईश्वरः शर्व्व ईशानः शङ्करश्चन्द्रशेखरः।।
भूतेशः खण्डपरशुगिरीशे गिरीशो मृडः।
मृत्युञ्जयः कृत्तिवासः पिनाकी प्रथमाधिपः।।
उग्रः कपर्दी श्रीकण्ठः शितिकण्ठः कपालभृत्।

वामदेवो महादेवो विरूपाक्षस्त्रिलोचनः।।(Abhimanyu)

शिवशब्दस्याभिनवव्याख्योपलभ्यते शिवपुराणे-

शं नित्यं सुखमानन्दमिकारपुरुषः स्मृतः।
वकारं शक्तिरमृतं मेलनं शिव उच्यते।।(Sastri)

शिवतत्त्वसमृद्धं दर्शनं शैवदर्शनमिति। भारतीयास्तिकेषु दर्शनेषु शैवदर्शनमन्यतममिति प्रवदन्ति विबुधाः। देवत्रयेष्वन्यतमं देवं पशुपतिं तथा शिवमवलम्ब्य दर्शनसाहित्येषु शैवदर्शनस्याविर्भावोऽभवत्। अस्य शैवदर्शनस्य मुख्यतः चतुष्टयविभागोऽस्ति। तद्यथा- काश्मीरीयाभेदवादिप्रत्यभिज्ञा तथा काश्मीरीयशैवदर्शनम्, भेदाभेदवादिशास्त्रे वीरशैवसिद्धान्तः, अद्वैतवादिपाशुपतं तथा नाकुलीशपाशुपतम्, श्रीकण्ठस्य शिवविशिष्टाद्वैतवादश्चेत्यादयः। प्रत्याभिज्ञा शब्दस्यार्थः प्रतिमाभिमुखिनं ज्ञानम्- प्रत्यभिज्ञा प्रतिमाभिमुख्येन ज्ञानम्।(शर्मा) एवञ्चोक्तम्- प्रतीपमात्माभिमुख्येन ज्ञानं प्रकाशः प्रत्यभिज्ञा।(शर्मा) तदपि चोच्यते- लोके हि स एवायं चैत्र इति प्रतिसन्धानेनाभिमुखीभूते वस्तुनि ज्ञानं प्रत्यभिज्ञेति व्यवह्रियते।(शर्मा) अज्ञानतावशत अविद्यावशतो वा जीवः शिवत्वरूपात्मसम्पर्कीयबोधाद्विस्मृत्याणुत्वप्राप्तर्भवति। तदनन्तरं सः जीवरुपासनानुष्ठानेन सर्वप्रकारकज्ञानमविद्याजनितपाशछिन्ने सति सोऽहमिति प्रकारेण शिवस्वरूपप्रतिष्ठिते सति प्रत्यभिज्ञा स्यात्। इदं प्रत्यभिज्ञादर्शनं काश्मीरीयशैवदर्शनं वा स्पन्ददर्शनं त्रिक्दर्शनमिति नाम्नाऽपि प्रसिद्धम्। इदं मतानुसारेण शिवः केवलः सृष्टेरादौ विद्यमान आसीदिति श्वेताश्वतरोपनिषदि मन्त्रितम्-

यदाऽतमस्तन्न दिवा न रात्रिः
न सन्न चासञ्छिव एव केवलः।
तदक्षरं तत् सवितुर्वरेण्यं
प्रज्ञा च तस्मात् प्रसृता पुराणी।।(Lokeswarananda)

अर्थात् यस्मिन् कालेऽज्ञानं नासीत्, समयो दिवा च नासीत्, नक्तमपि नासीत्, सत्ता नासीत्, अभावोऽपि नासीत्, तस्मिन् काले केवलः शिव आसीत्। स अक्षरः, आदित्यमण्डलवर्तिपुरुषाणामाराध्यः। तस्मात् शिवात् गुरुपरम्परागतं ज्ञानं विवेकिपुरुषेषु प्रकाशितमभवत्। तदपि चोच्यते शिवसंसृष्टं त्रिविधतत्त्वं प्रतिफलितं शैवशास्त्रे। शैवागमपरिभाषामञ्जरीग्रन्थानुसारेण वक्तुं शक्यते- पतिः पशुः पाशश्चेति त्रिविधं तत्त्वं प्रत्यभिज्ञादर्शने तथा काश्मीरीयशैवदर्शनेऽङ्गीकृतम्- पशुः पाशः पतिश्चेति त्रिपदार्थ उदाहृतः।(Ayenger) तत्वप्रकाशे महर्षिणा भोजदेवेनाप्युक्तम्- शैवागमेषु मुख्यं पतिपशुपाशाविति क्रमात्त्रितयम्। श्वेताश्वतरोपनिषद्यपीदं तत्त्वत्रयमुल्लिखितम्-

भोक्ता भोग्यं प्रेरितारञ्च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतत्।।(Lokeswarananda)
साधकसाधनयोर्दृष्ट्यास्यार्थः:-

| भोक्ता | भोग्यम् | भोगः |
|---|---|---|
| पतिः | पाशः | पशुः |

गीतायामपि दृष्टम्-

उपद्रष्टाऽनुमन्ता च भर्ता भोक्ता महेश्वरः।
परमात्मेति चाप्युक्तो देहेऽस्मिन् पुरुषः परः।।(घोष)

अस्य सामग्रिकार्थः स्यात्-

| भोक्ता | भोग्यम् | प्रेरिता |
|---|---|---|
| जीवः | माया | ब्रह्म |
| जीवात्मा | प्रकृतिः | परमात्मा |
| पशुः | पाशः | पतिः |

- **पाशतत्त्वम्-**

शैवदर्शनस्यान्यतमालोच्यतत्त्वं विषयो वा भवति पाशतत्त्वम्। पतिः स्यात् चैतन्यस्वरूपः सर्वज्ञानयुक्तसर्वक्रियाविषये स्वतन्त्रश्च। चार्वाकबौद्धादिदर्शने यदात्मतत्त्वमस्वीकृतं तत् शैवदर्शने स्वीकृतं चैतन्यमयपरमात्मारूपेण। शिवसूत्रविमर्शिन्यां कथितमस्ति- लौकिक-चार्वाक-वैदिक-योगाचार-माध्यमिकाद्यभ्युपगतानि आत्मा अपि तु यथोक्तम्।(जयदेवसिंहः) पतिः परमेश्वरो वात्मारूपेण वन्दितम्- चैतन्यमात्मा।(जयदेवसिंहः) चैतन्यमिति शब्दः चित्शब्दोत्तरं ष्यण् प्रत्यययोगेन निष्पन्नः। अस्य पदस्य व्युत्पत्तिप्रसङ्गेनोक्तम्- चेतयते इति चेतनः सर्वज्ञानक्रियास्वतन्त्रः, तस्य भावः चैतन्यं सर्वज्ञानक्रियासम्बन्धमयं परिपूर्णं स्वातन्त्र्यम्।(जयदेवसिंहः) अतोऽयं चेतनरूपपरमेश्वरपतिस्तथा परमात्मा सर्वप्रकारकज्ञानविषये सकलप्रकारकक्रियाविषये च सर्वदा स्वातन्त्र्यं प्रकाशयति। या क्रिया कस्यचिद् बाह्यद्रव्यस्योपरि नावलम्बिता सा क्रियास्वातन्त्र्यरूपेण विवेचिता। तस्मिन् परमसत्तायां क्रियाशक्तेर्विद्यमानत्वात् तन्न वेदान्तदर्शनसम्मतब्रह्मतत्त्ववत्। यस्मात् शैवदर्शने स्वीकृतं पतितत्त्वं सक्रियशक्तिसम्पन्नम्। इदं सक्रियपरमात्मारूपपतितत्त्वं सृष्टिकार्ये सम्पूर्णरूपेण स्वातन्त्र्यं दर्शयति। तदा सः पतिः निखिलविश्वस्यात्मारूपेण परिचितः स्यात्- विश्वस्यात्मा शिवः ...।(जयदेवसिंहः) विश्वस्यात्मेत्यनेन शब्देन विश्वस्य स्वरूपं प्रतिभातं स्यात्। यस्मात् शिवस्य चैतन्यमयत्वं स्वीकृतं स्यात्। विश्वमयपरिव्याप्तचैतन्यमयोऽयं सत्ता विश्वमतिक्रम्य विश्वातीतरूपेण स्वप्रकाशे समर्थः स्यात्। सः चैतन्यमयशिवोऽज्ञानस्य उपाधितः सर्वकाले मुक्तरूपेण स्वीकृतः स्यात्- परमात्मस्वरूपन्तु सर्व्वोपाधिविवर्जितं चैतन्यमात्मनो रूपम् ...।(जयदेवसिंहः) अतिजागतिकविषये जागतिकविषये च सकलप्रकारकं ज्ञानं तत्र चैतन्यमये शिवे विद्यमानत्वात् सः सर्वज्ञरिति। एवंप्रकारेण सर्वक्रियायाः सर्वकर्मणश्च कर्ता सः शिवः। तस्मात् सः सर्वकर्ता। सर्वभूते तथा पार्थिवापार्थिवसर्वपदार्थेषु सः व्याप्तमयः। तद्धेतौ सः सर्वव्यापकः। एतेषां वैशिष्ट्याणां तत्र विद्यमानत्वात् सः शिवः- सर्वज्ञः सर्वकर्ता च व्यापकः परमेश्वरः।(अधिकारी) शास्त्रे उच्यते- चैतन्यं चितिः चेतनात्मेति राहोः शिर इतिवत् काल्पनिकम्, वस्तुत एकमेव सर्वम्, चितिक्रिया प्रकाशविमर्शः तस्य भावः चैतन्यं स्वातन्त्र्यम्।(जयदेवसिंहः) प्रकाशो भवति चितिक्रिया विमर्शः प्रकाशस्य स्वभावरूपेण प्रसिद्धः। पुनश्च परमेश्वरस्य शक्तिर्विमर्शः। स्थूलदृष्ट्या प्रकाशविमर्शयोर्मध्ये भिन्नताऽस्तीति। परन्तु प्रकृततया प्रकाशविमर्शयोर्मध्ये नास्ति कश्चिद्भेदः। द्वयमिदमभिन्नतत्त्वम्। यतः प्रकाशस्य स्पन्दनं तु विमर्शपदवाच्यम्। अतः स्पन्दनं भवति प्रकाशस्य प्राणाः। अस्य स्पन्दनस्य पर्यायवाची शब्दस्तु स्फुरणमिति दर्शनपरम्परायां प्रसिद्धम्। पतिस्तथा परमेश्वरः प्रकाशविमर्शात्मकः स्पन्दनात्मको वा। स्पन्दनशब्दस्यार्थः न केवलं कम्पनं चिदात्मकपतिः परमेश्वरो वा स्वेच्छया यज्जगत् सृजति तज्जगत् सृष्टिरर्थं यत् संकल्पात्मकोन्मुखीनता तदप्यर्थः ग्राह्यः। स्पन्दशास्त्रे उन्मेष-निमेषादिशब्दैः तदवस्था वर्णिता- यस्योन्मेषनिमेषाभ्यां...।(नीलकण्ठगुरुटु) पुनश्च सर्वव्यापी परमेश्वरः पूर्वकल्पानुसारेण तान् संघातान् देवान् प्रसृज्य स्वयमेव तेषामुपरि स्वाधिपत्यं स्थापयति। श्वेताशतरोपनिषद्यस्य मतस्य समर्थनं प्राप्यते। तत्र श्वेताश्वतरोपनिषदि ऋषिणा श्वेताश्वतरेणोक्तम्-

एकैकं जालं बहुधा विकुर्व-
न्नस्मिन् क्षेत्रे संहरत्येष देवः।
भूयः सृष्ट्वा पतयस्तथेशः
सर्वाधिपत्यं कुरुते महात्मा।।(Tyagisananda)

अस्मिन् मन्त्रे जालमिति शब्दस्यार्थः पाशः। पतिः जालं तथा पाशं बहुविधं कृत्वा जगदिदं रचितवान्। पशुः तथा जीवः तस्मिन् जाले पाशे वा पतित्वा सुखं दुःखञ्चानुभवति। अस्य पाशस्य विविधा शक्तिर्वर्तते। वैचित्र्यमयस्य जगतः प्रकाशे पत्युः परमेश्वरस्य वा

स्वातन्त्र्यं शक्तिप्रधानम्। चित्शक्ति-आनन्दशक्ति-इच्छाशक्ति-ज्ञानशक्ति-क्रियाशक्तिस्तु पत्युस्तथा परमेश्वरस्याभिन्नशक्तिरूपेण स्थित्वा विचित्रस्यास्य जगतः प्रकाशघटयित्री। एतासां शक्तिनां समन्वयात् परमेश्वरः महेश्वरः शक्तिमान्नित्याख्यया प्रसिद्धः- शक्तिमांस्तु महेश्वरः।(जयदेवसिंहः) एतासु पञ्चविधशक्तिसु चित्शक्ति-आनन्दशक्तिश्च परमेश्वरस्य स्वरूपशक्तिरूपेण विवेचिता स्यात्। तस्मात्तस्य परमेश्वरस्य तथा पत्युः विशेषवैशिष्ट्यं स्याच्चिदानन्दस्वरूपम्। इच्छाशक्तिस्त्वानन्दशक्तेः चमत्कारिता। ज्ञानशक्तिः खलु विमर्शात्मिका। पुनश्च विविधरूपस्य प्रकाशशीलताधर्मात्मिका क्रियाशक्तिः। तदुच्यते शैवशास्त्रे- तस्य च स्वातन्त्र्यमानन्दशक्तिः तच्चमत्कारेच्छाशक्तिः प्रकाशरूपताच्छक्तिः विमर्शात्मकता ज्ञानशक्तिः सर्वाकारयोगित्वं क्रियाशक्तिः।(तान्त्रिक) अस्यामुपनिषद्यपि दृश्यते-

न तस्य कार्यं करणञ्च विद्यते
न तत्समश्चाभ्यधिकश्च दृश्यते।
परास्य शक्तिर्विविधैव श्रूयते
स्वाभाविकी ज्ञानबलक्रिया च।।(गिरि)

अत्र ज्ञानस्यार्थः वस्तुप्रकाशिकाऽविद्यावृत्तिकान्तःकरणवृत्तिश्च। बलमुत्साहः, क्रिया खलु व्यापारः। अस्याः टीकाकारेण शङ्करानन्देनोक्तम्- ज्ञानमविद्यावृत्तिरन्तःकरणवृत्तिश्च वस्तुप्रकाशिकां बलं प्राणा उत्साहः प्रयत्न इत्यर्थः। क्रियाव्यापारमात्रज्ञानं च बलं च क्रिया चेति ज्ञानबलक्रिया। ... तथाऽप्यविरोधो बलशक्तेः क्रियाशक्तावन्तर्भावाच्चमत्कारात् संस्कारशक्तिः संबन्धशक्तिश्च।(आपटे) नारायणाचार्यस्य मते तु ज्ञानबलेन साकं युक्ता क्रियाशक्तिः- शक्तिः श्रुयते वेदेषु स्वाभाविकी सहजसिद्धा ज्ञानबलाभ्यां युक्ता क्रिया क्रियाशक्तिः।(आपटे) पण्डितशिरोमणिः टी.डी. सिद्धप्पाराध्यः महोदयः सुयुक्तेन मतेनोक्तं परमेश्वरस्य विविधा शक्तिः पुष्पे गन्धवत्, चन्द्रे चन्द्रिकावत्, क्षीरे माधुर्यवदिति- सा च स्वाभाविकी नित्यसहजसिद्धा पुष्पे गन्ध इव, चन्द्रे चन्द्रिकेव क्षीरे माधुर्यमिव शक्तिः परशिवे अविनाभावतया प्राणरूपेण विलसति।

न शिवेन विना शक्तिर्न शक्तिरहितः शिवः।
पुष्पगन्धवदन्योन्यं मारुताम्बरयोरिव।।

इत्यभियुक्ताः शिवशक्तयोः परस्परसम्बन्धं साहजिकं वदन्ति।(सिद्धप्पाराध्य) इयं परमा शक्तिः सच्चिदानन्दरूपिणीति परमपतिस्तथा परमेश्वरशिववत्। पतिपाशयोर्मध्ये शक्तितः भेदः नास्ति। सा ज्ञानबलक्रियायुक्ता परमाशक्तिः स्वयमेवेच्छारूपिणी, याऽन्तरङ्गे ज्ञानमयी बहिरङ्गे बलक्रियामयी। विश्वेऽन्तरे बाह्ये च यत् सर्वं प्रतीतिगोचरं तत् सर्वमेव पतिपाशशक्तेर्प्रकाशम्- शक्तयोऽस्य जगत्कृष्णं...।(जयदेवसिंहः) परमेश्वरस्य स्वातन्त्र्यशक्तिः जगन्मयप्रकाशे इच्छारूपेण परिणता स्यात्। ज्ञानशक्तिः क्रियाशक्तिश्च परमैश्वर्यसम्पन्ने परमेश्वरे विभवे परिपूर्णा स्यात्। तस्य परमेश्वरस्य शक्तिर्विविधत्वेऽपि मूलतया पत्युः तथा परमेश्वरस्य नातिरिक्ता शक्तिः। शक्तेरनस्तित्वे कल्पने शक्तिमानप्रसङ्गो बाधितः स्यात्। तस्मात् कारणात् काश्मीरीयशैवदर्शने तथा चान्यत्रापि शैवप्रस्थाने यदि शक्तिरस्वीकृता स्यात् तर्हि शिवः शवसादृश्यं स्यात्। अग्नि-दाहिकाशक्तिमध्ये यथाऽभेदसम्बन्धः स्वीकृतस्तथैव शक्ति-पतिमध्ये भेदसम्बन्धः कदापि न वर्णनीयः कल्पनीयो वा। शास्त्रे परिलक्षितं स्यात्- शक्तिशक्तिमतिर्भेदः शैवे जातुः न वर्ण्यते।(चतुर्वेदी) तस्मात् त्रिक्दर्शने तथा काश्मीरीयशैवपरम्परायां पाशः अविद्या विद्या बन्धनं वेत्यादिरूपेण व्यवहारिकसत्तारूपेण च स्वीकृतमिति। पाशशब्दस्यार्थः जीवानां बन्धनस्यापरं नाम। परन्तु ज्ञानं पाशस्य तथा बन्धनस्य कारणरूपेणोद्घोषितम्- ज्ञानं बन्धः।(श. द्विवेदी) पतिस्तथा परमेश्वरसम्बन्धेऽपूर्णमपरिमितमयथार्थं ज्ञानं बन्धस्य कारणमित्युक्तम्। सुख-दुःख-मोहात्मक-अध्यवसायादिनां वृत्तिनिरूपितानां भेदज्ञानानां मूलमिदमपरिमितं ज्ञानं बन्धनम्-

सुखदुःखमोहमयाध्यवसायादिवृत्तिरूपं तदुचितभेदावसानात्मकं यत् ज्ञानं तत् बन्धः।(जयदेवसिंहः) पाशतत्त्वमिदं तत्रिविधम्। तद्यथा- पाशोऽपि त्रयो ज्ञेयो मलं माया कर्म च।(श. द्विवेदी) अद्वैततत्त्वसमृद्धेऽस्मिन् त्रिक्दर्शने अघटनघटनपटीयसी माया पाशरूपेणाभिहिता। परमशिवस्य परिग्रहशक्तिस्तु मायेति प्रसिद्धा। परन्त्वत्र पाशः परमेश्वरादभिन्नः। पाशस्तथा माया सत्त्व-रजः-तमो इति त्रिगुणात्मिका। परमेश्वरसहायेन तस्मात् पाशात् महदादितत्त्वानां समुत्पत्तिः। मायास्वरूपे शिवसूत्रे कथितमस्ति- कलादिनां तत्त्वानामविवको माया।(जयदेवसिंहः) अस्मिन् जगति संसारे वा पतिः भोक्ता भोग्यरूपेण सर्वत्रैव विराजते। शास्त्रे आमन्त्रितम्-

तेन शब्दार्थचिन्तासु न सावस्था न यः शिवः।
भोक्तैव भोग्यभावेन सदा सर्वत्र संस्थितः।।(नीलकण्ठगुरुटु)

परमेश्वरोऽयं स्वेच्छया संकीर्णरूपेण पशुसत्तायामाविर्भूतः स्यात्। पशुपतिमध्ये नास्ति कश्चिद्भेदः। पाशतत्त्वस्य प्रभावेन पशुः परमेश्वरात् पृथगिति प्रतीतिर्भवति। त्रिक्दर्शनानुसारेण तथा काश्मीरीयशैवदर्शनानुसारेण पतिपशुपाशतत्त्वं सर्वैवैकीभूतं तत्त्वम्। प्रलयकाले पशुः पाशश्च परमेश्वरे लीनं स्यात्। पतिः स्यात् समुदयजगतः सर्वपदार्थानामधिष्ठाता। यतः प्रतिभासितमिदं जगत्प्रपञ्चं सर्वदा परमेश्वरे प्रतिष्ठितम्। तस्मात् सः पतिस्तथा परमेश्वरः प्रतिवस्तुनि व्याप्तोऽस्ति- तस्मात् तमधिष्ठातृभावेन सर्वव्यापकत्वेन स्वभावं पश्यन् विस्मयाविष्ट इव यस्तिष्ठन्ति।(नीलकण्ठगुरुटु) सूक्ष्मतमं पतिपशुपाशतत्त्वमिदं व्यतिरिक्तं नास्ति किञ्चन तत्त्वम्। तत्त्वत्रयमिदं ज्ञातव्यम्। एतद् ज्ञात्वा मुक्तिर्भवतीति।

एतज्ज्ञेयं नित्यमेवात्मसंस्थं
नातः परं वेदितव्यं हि किञ्चिद्।
भोक्ता भोग्यं प्रेरितारञ्च मत्वा
सर्वं प्रोक्तं त्रिविधं ब्रह्ममेतद्।।(Lokeswarananda)

- **सिद्धान्तः-**

विश्वसंस्कृतौ परम्परायाञ्च यानि यानि तत्त्वानि गुरुत्वपूर्णानि तानि सर्वाणि तत्त्वानि भारतीयसाहित्ये सम्यक्तया प्रतिफलितानि। भारतीयसाहित्येषूपनिषद्साहित्यन्यतममिति सर्वादौ वर्णितं संक्षिप्ततया। परन्तु साहित्यसंस्कृतितत्त्वेषु दार्शनिकतत्त्वं दार्शनिकतत्त्वेषु शैवदार्शनिकतत्त्वं शैवदार्शनिकतत्त्वेषु काश्मीरीयशैवदार्शनिकतत्त्वं तथा त्रिकतत्त्वं तत्रापि पाशतत्त्वमतीव सुप्रसिद्धं भारतीयवाङ्मये साहित्ये संस्कृतौ च। यद्यपि पाशतत्त्वमस्मिन् शोधप्रबन्धे विशदतया विश्लेषितं तथापि पतितत्त्वेन साकं सम्बद्धयुतं पतितत्त्वं पशुतत्त्वञ्च श्वेताश्वतरोपनिषदि प्रतिफलितमस्ति। श्वेताश्वतरोपनिषदि प्रतिफलितं पतितत्त्वं पशुतत्त्वञ्च नीत्वोत्तरकाले शोधकार्यं सम्पूर्णतया भवितव्यमिति मे आशयः। पुनश्च वक्तव्यं अस्मिन् शोधकार्ये तथा शोधप्रबन्धे काश्मीरीयशैवदर्शनसम्मतं पतितत्त्वं विश्लेषितं परन्तु तन्न सम्यक्तयाऽभवदिति मे चिन्तनम्। अतः परवर्तिनि काले कोऽपि शोधकर्ता यदि श्वेताश्वतरोपनिषदि प्रतिफलितं शैवदर्शनस्य चतुष्टयविभागानुसारं पति-पशु-पाशतत्त्वं विश्लेषणं करिष्यति तर्हि शोधप्रबन्धोऽयं सार्थकं भवितव्यमिति तन्मे मनः शिवसंकल्पमस्त्विति शम्।

## References


1. Abhimanyu, Shri Munna Lal. The Amara-Kosha of Shri Amar Sinha. Benares: Master Khenlilal & Sons, Sanskrit Book Depot., 1937.
2. Ayenger HR. Rangaswami. Saiva- Paribhasa. Mysore: Government Branch Press, 1950.
3. Bhattacharya AN. One Hundred and Twelve Upanishads and Their Philosophy. Delhi: Parimal Publication, 1987.
4. Chakravarti SC. The Philosophy of the Upanishads. Delhi: Nag Publishers, 1979.
5. Deussen Paul. The Philosophy of the Upanishads. Delhi: MLBD, 2011.
6. Lokeswarananda Swami. Svetasvatara Upanisad. Calcutta: The Ramkrishna MIssion Institute of Culture, 2014.
7. Ranade RD. A Constructive Survey of Upanishadic Philosophy. Bombay: Bharatiya Vidya Bhavan, 1986.

8. Sarup Lakshman. The Nighantu and The Nirukta. Delhi: MLBD, 1967.
9. Sastri JL. The Siva-Purana. Benaras: MLBD, 2014.
10. Tapasyananda Swami. Saundarya Lahari of sri Sankaracharya. Chennai: Sri Ramkrishna Math, 1987.
11. Tyagisananda Swami. Svetasvataropanisad. Madras: Sri Ramkrishna Math, 1971.
12. Vasu, Srisa Chandra. The Astadhyayi of Panini. Calcutta: Sindhu Charan Bose, Panini Office, 1897.
13. अधिकारी, रामचन्द्र. श्रीविज्ञानभैरवः. बर्धमान: बर्धमानविश्वविद्यालय, 1980.
14. अनिर्वाण, श्रीमत्. उपनिषत् प्रसङ्ग. बर्धमान: बर्धमानविश्वविद्यालय, 1996.
15. आपटे, विनायक गणेश. श्वेताश्वतरोपनिषत्. पुणा: आनन्दाश्रममुद्रणालय, 1927.
16. गम्भीरानन्द, स्वामी. उपनिषद् ग्रन्थावली. Vol. 1. कलकाता: उद्बोधन कार्यालय, 2013
17. गिरि, महेशानन्द. श्वेताश्वतरोपनिषद्. वाराणसी: श्री दक्षिणामूर्ति मठ, 1975.
18. घोष, जगदीशचन्द्र. श्रीमद्भगवद्गीता. कलकाता: प्रेसिडेन्सी लाइब्रेरी, 1424 बङ्गाव्द.
19. चतुर्वेदी, राधेश्याम. शिवदृष्टिः. वाराणसी: वाराणसी संस्कृत संस्थानम्, 1986.
20. चौवे, ब्रजविहारी. ऋग्वेदसंहिता. नई दिल्ली: इन्दिरा गान्धी राष्ट्रिय कलाकेन्द्र, 2009.
21. जगन्नाथशास्त्री. शुक्लयजुर्वेदः रुद्राध्यायः. वाराणसी: चौखम्बा संस्कृत सिरिज, 1977.
22. जयदेवसिंहः. शिवसूत्रम्. वाराणसी: मोतिलाल वनारसीदास, 1979.
23. तर्करत्न, पञ्चानन. मनुसंहिता. कलकाता: संस्कृत पुस्तक भाण्डार, 1993.
24. तान्त्रिक, नारायण. तन्त्रसारसंग्रहः. दिल्ली: चौखम्बा संस्कृत प्रतिष्ठानम्, 1992.
25. द्विवेदी, कपिलदेव. वैदिक साहित्य एवं संस्कृति. वाराणसी: विश्वविद्यालय प्रकाशन, 2010.
26. द्विवेदी, श्यामाकान्त. काश्मीरीय शैवदर्शन एवं स्पन्दशास्त्र (शिवसूत्र, स्पन्दशास्त्र एवं शक्तिसूत्रसमन्वित). वाराणसी: चौखम्बा सुरभारती प्रकाशन, 2009.
27. नीलकण्ठगुरुटु. स्पन्दकारिका. वाराणसी: मोतिलाल वनारसीदास, 1985.
28. मेधाचैतन्य, ब्रह्मचारी. वेदान्तसारः. कलकाता: आद्यापीठ, 2014.
29. शर्मा, उमाशङ्कर. सर्वदर्शनसंग्रहः. वाराणसी: चौखम्बा विद्याभवन, 2016.
30. सिद्धप्पाराध्य, टी. जी. श्वेताश्वतरोपनिषद्. वाराणसी: शैवभारती शोध प्रतिष्ठानम्, 2006.
31. हरिदाससिद्धान्तवागीश. महाभारतम्. कलकाता: विश्ववाणी प्रकाशनी, 1383 बङ्गाव्द.